स्मरगरलखण्डनं मम शिरसि मण्डनं धेहि पदपल्लवमुदारं ज्वलति मयि दारुणो मदनकदनानलो हरतु तदुपाहितविकारं ७ इति चटुलचाटुपटुचारुमुरवैरिणो राधिकामधिव
चनजातं जयति पद्मावतीरमणजयदेवकविभारतीभणितमतिशातं ८ परिहर कृतातङ्के शङ्कां त्वया सततं घनस्तनजघनयाक्रान्ते स्वान्ते परानवकाशिनि विशति वित
नोरन्यो धन्यो न कोपि ममान्तरं प्रणयिनि परीरम्भारम्भे विधेहि विधेयतां ९ मुग्धे विधेहि मयि निर्दयदन्तदंशदोर्वल्लिबन्धनिबिडस्तनपीडनानि चण्डि त्वमेव मुदमंच न पंचबाणचाण्डा

चटुलः सुन्दरश्चले चटुचाटुप्रियंवाक्यं पटुरप्रतीणोनीरोगेभ्य चारुर्नेत्रसम्बदिति विश्वः शर्मशातसुखानि चेत्यमरः ८ परिहरेत्यादि हे कृतातङ्के विहितमनस्तापे शङ्कामन्यरमणाशङ्कां परिहर
त्यज यतो मम स्वान्ते चित्ते तनुरनङ्गादन्यो धन्यो न विशति कुतो न विशति तत्राह परानवकाशिनि परा न अवकाशो यस्मिन् तत्र पिहितं त्वयेति घनेति विशे
षणं कुतः घनस्तनजघनयाक्रान्ते घनौ निविडौ स्तनौ जघनं च यस्यास्तया आक्रान्ते व्याप्ते तथा च सदा त्वमेव मम स्मरसि मदीये हृदये अन्यप्रवेशस्थानमेव नास्ति अतो हे प्रणयिनि त्वत्सम्बन्धात्मनि तस्मात् परीरम्भारम्भे आलिं
गनारम्भे विधेयतां वचनकारित्वं विधेहि कुरु परिरम्भारम्भेति मदुक्तं कुर्वित्यर्थः उक्तं च शंका स्वान्तं हृन्मनः ९ वचनकारित्वेन ध्यानेन तदन्यविधिनदा मम अपराधानुकूलं दण्डं तस्माद्
१० मुग्धे इत्यादि हे मुग्धे सुन्दरि निर्दयं दारुणं दन्तदंशं दशनदंशनं दोर्वल्लिबन्धं भुजलताबन्धनं निबिडगाढस्तनाभ्यां पीडनं च विधेहि कुरु हे चण्डि कोपने त्वमेव मुदमानन्दमेव प्रा
प्नुहि न पुनः पंचबाणः कामः स एव निरपराधमारणहिंसकत्वेन चाण्डालस्तस्य काण्डपतनात् शरपातात् असवः प्राणाः प्रयान्तु निर्गच्छन्तु चाण्डालप्रहारेण मरणं न सम्यगिति
रत्नत्वपापाद्देवमयोचितदण्डं चरणं विधेयमिति भावः चण्डिका पापनी हिंसा कोपनासु त्रिषु संमतेति विश्वः ॥२॥ ॥श्रीराधारमणाय नमः॥ ॥

नत्वकोपेनास्येवेत्यत आह। शशिमुखीत्यादि। हे शशिमुखि चंद्रानने तव भंगुरभ्रूः कुटिलाभ्रूः भाति। कीदृशी युवजनानां तरुणजनानां मोहाय संमोहनाय कराला भीषणः कालसर्प
इव भुजंग इव दृष्टा मोहयति। अयं सर्पस्तु दृष्ट्वा मोहयतीत्यस्याः करालत्वं। तन्मत्वदुदितविषभंजनाय त्वत्संगमाशा उदिते सम्मूर्छने यद्विषं तस्य भंजनाय पुनरागमनाय
त्वदधरसीधुसुधैव त्वदीयाधर एव सीधुमधु दिव्यविशेषस्तदेव सुधामृतं तदन्यमौषधं न सिद्धः साधितो मंत्रः अन्यो मंत्रो जपादिना विषं नाशयति। अयं तु आस्वादिते एवेति तस्यान्यमंत्रा
पेक्षया सिद्धत्वम्। तथा चायमपि त्वद्भ्रूकालसर्पीविषमूर्छितस्त्वन्नामौषधेन त्वदधरसुधापानमिति भावः। करालो भीषणो न्यत्सर्वादेति विग्रहः॥ २॥ अथ पतीति। हे तन्वि तव यथा
तन्मकारणकं वा स्वबंधनं मा अयमतिपीडयति। किं च हे तन्वि मधुरालापैः पंचमस्वरविशेषं प्रपंचय विस्तारय। किं च दृष्टिभिर्वलोकनैस्त्वापं संतापं विनोदय विशेषेण पसारय। हे सुमुखि
विमुखीभावं मयि विमुखतां मा पिबि त्यज मुग्धत्वं सुभ्रु प्रियतममुपचितमिति भावः। मां न गच्छ एनं न त्यज। हे मुग्धे प्रियः स्वयमागत एव उपस्थित आगतः। अतिदुःखः। शान्तिः पतिः उपस्थितोऽस्मि

शशिमुखि तव भाति भंगुरभ्रूर्युवजनमोहकरालकालसर्पी। तदुदितविषभंजनाय यूनां त्वदधरसीधुसुधैव सिद्धमंत्रः॥ ३॥ व्यथयति विफलं मौनं तन्वि प्रपंचय पंचमं तरुणि
मधुरालापैस्तापं विनोदय दृष्टिभिः। सुमुखि विमुखीभावं तावद्विमुंच न मुंच मां स्वयमतिशयस्निग्धो मुग्धे प्रियोऽयमुपस्थितः॥ ४॥ बंधूकद्युतिबांधवोऽयमधरः स्निग्धो मधूक
च्छविर्गंडश्चंडि चकास्ति नीलनलिनश्रीमोचनं लोचनं। नासाभ्येति तिलप्रसूनपदवीं कुंदाभदंति प्रिये प्रायस्त्वन्मुखसेवया विजयते विश्वं स पुष्पायुधः॥ ५॥ ॥

यत्नेनैवागता न चागतत्वमगागतः प्रियो स्नातुंतो विनयतीति भावः॥ ४॥ संप्रति मानवत्यास्तस्मुखेनैव कोपापीडयमस्त्वं प्रसीदेत्याशयेनाह। बंधूकेत्यादि। हे चंडि कोपने यत्तवाधरो बंधूकच्छविर्बं
धूकपुष्पस्येव छविर्यस्य तिबांधवः। बंधूकस्य पुष्पविशेषस्य या द्युतिर्दीप्तिस्तस्या बांधवः सुहृत् अतएव बंधवत्त्वनिरूपणेन बंधूकद्युतीनामधरे नित्यं स्थितिर्व्यज्यते। अयं स्निग्धो गंडः कपो
लः बंधूकच्छविर्मधूकपुष्पस्येव छविः कांतिर्यस्य तादृशः मधूककांतिः शोभते। लोचनं नीलनलिनश्रीमोचनं स्वकांत्या नीलनलिनस्य नीलोत्पलस्य श्रियं कांतिं मोचयति त्यज
तीति तादृशं। प्रत्यक्षस्वभावमेव नीलतारकत्वान्नीलं चक्षुर्जनेन मुग्धानां नीलमिति नीलोत्पलमपि निरीक्ष्यतादृग्भासः। हे कुंदाभदंति कुंदपुष्पस्येवाभा दीप्तिर्येषां तादृशा दंता यस्याः
ता संबोधनं नासा तिलप्रसूनपदवीं तिलपुष्पस्य तिलपुष्पस्य शृंगारेऽग्रे नासा पतति तिलप्रसूनपदवीं गच्छति। पुष्पायुधः पुष्पमेवायुधं शस्त्रं यस्य कामः स त्वन्मुखसेवया त्वन्मुखमेव सेवते
नाकस्थं तं न विश्वं विजयते। कामः पंचभिरेव शरैर्विश्वं जयति। त्वन्मुखे बंधूकनीलोत्पलतिलपुष्पकुंदपुष्पाणि पंचसंती तत्त्वन्मुखेनैव कामो विश्वं जयतीति भावः॥ बंधूकं वं
अतो

दृशौ तवेत्यादि। हे मन्विप्र चंद्रीगत्या प्राप्तानि विबुधयौवनं देवयुवतीनां तारुण्यमहो आश्चर्यं वहसि धारयसि तदेवाह दृशाविति तव दृशौ नेत्रे मदालसे मदेन हर्षेणालसे मंथरे अथ
च मदालसा स्वर्वेश्या। तथा च स्वर्गे एके वमदालसा त्वं तु नेत्रे एव मदालसे द्वे धारयसीत्याश्चर्यमिति भावः। तव वदनमिंदुमत्यास्पदं इंदुर्विष्णुपत्नी प्रभा। तेनेतिस्थानमास्पदं विषयइम
र्थः। तव वक्त्रे अपि इंदुरिति। निर्वृतिलोकानामिति भावः। अथ वा इंदुमती या देवांगना तस्याः आस्पदमाश्रयः। तव गतिर्जनमनोरमा लोकानां मनोरमा मनोहारिणी। अथवा
मनोरमा नाम्नी या देवांगना तदात्मिका। रंभावत्सी रंभा कदली केनेवा तथा तवोरू ऊरुयुगं विभ्रमरतिभं वि भ्रमेण भ्रमयति। कलाभिरेव दत्तं पीयते नादृशं। अथवा रंभा स्वर्वे
श्या स्वर्गे एकैव रंभा त्वदूरू द्वयमपि द्वे धारयसीति भावः। अथ तव रतिः सुरतकेलिः कलावती कौशलशालिनी। अथ च कलावती नाम्नी देवांगना। तथा तव भ्रुवौ चित्रलेखे

दृशौ तव मदालसे वदनमिंदुमत्यास्पदं गतिर्जनमनोरमा विधुतरंभमूरुद्वयं रतिस्तव कलावती रुचिरचित्रलेखे भ्रुवावहो विबुधयौवनं वहसि तन्वि पृथ्वीगता॥ ६॥
इति श्रीगीतगोविंदे मानकोपे जयदेवकृतौ चतुरचतुर्भुजो नाम दशमः सर्गः॥ १०॥ श्रीराधारमणाय नमः

रचितानि चित्रलेखा नाम चित्रविचित्राणि चित्रलेखारेखाभ्यां तादृशो अथवा चित्रलेखा देवांगना स्वर्गे एकैव चित्रलेखा त्वं तु द्वे भ्रुवौ चित्रलेखे धारयसीत्याश्चर्यमिति भावः। शार्दूलेनालंकारः
लंकारः। शार्दूलविक्रीडितं वृत्तं। एषा लीलापदं पदे पदे दृश्यते। प्रीतिं कुरु मम मनोरथपूर्णमिति विग्रहः। युवतीनां समूहेषु पतिनमित्सां समूहे मोहतां गतः स्मरः॥ ६॥ कोपानुसार
मिति वितरस्मरं तं तवलं तालं स्तनिध्वनि पुनरं स्तनभारद्वयं। अत्यानमाकलनवितुं जयदेवकाव्ये चेतः सुकोकिलं द्विमांकनस्यपदीकां॥ १॥ करतु रुतेन पदार्थविशिष्टताभिः कलिं
द्वंद्विनीतदेविहारकारको हरिः॥ २॥ इति श्रीगीतगोविंदटीकायां मिश्रश्रीकांतविरचितायां पदभावार्थचंद्रिकानामधेयायां मानिनीवर्णने दशमः सर्गः॥ ॥१०॥ ॥

सुचिरेत्यादि कापि सखी राधां जगादोवाच । कृतनिजदोषे प्रस्फुरति सति कीदृशी इत्यधिगोपे दृशौ विभुम्भानि चोत्पनित्वविधिपयपहेलनामर्षं करोमि इति निगदाधिकार इत्यर्थः पुनः कस्मात्
केशवे मम सखी हरिनयनेत्राधां सुचिरं बहुकालं आप्यानुनयेन प्रणिपात्य प्रसाद्य मित्वा कुञ्जधामं गता धावे हित कुटीरमनरस्यपायनीयं गतवतिमसन्नति । कीदृशे केशवे हतवेशे कृता
नेकारे । कीदृशीं राधां रचितरुचिरमनोहराभूषां । हनिर्धयातां । पुनः कीदृशीं निर्गतो वसादः कृताभ्यमनजमदुःखं यस्याः तां १ तदेवगीतेन कथयति । विरचितेति गीतस्यास्य वसन्त
रागो यतितालः । गीतार्थस्तु । हे मुग्धे राधे मधुमथनं हरिमनुगतमनुसर कीदृशमनुगतं त्वामनुरक्तं अनुगतत्वमेवाह । विरचितेत्यादि । विरचिता रचिता चाटुवचनस्य रचना संदर्भो
येन तादृशं । पुनः कीदृशं चरणे रचितः प्रणिपातः प्रणामो येन तादृशं । तर्हि कुत्र गच्छामीत्याह । संप्रतीति संप्रत्यधुना मञ्जुलो मनोहरो यो वञ्जुलो वेतसः तस्य सीमनि निकटे
यत्केलिशयनं तत्र अनुयातं तादृशं प्राप्तं इत्यर्थः १ तां प्रोत्साहयन्ती सखीत्याह । घनेति हे राधिके उपैहि त्वं अनुगच्छ कथं यथा स्यात् मुख
रितः शब्दायमानः कृतो मणिमञ्जीरो यस्मिन् यथा स्यात् । पुनः कथं यथा स्यात् दरेण साध्वसेन मंथरः स्खलन् विहारः पदविन्यासो यत्र एवं यथा स्यात् अत्र हे घनतरगर्भ

सुचिरमनुनयेन प्रीणयित्वा मृगाक्षीं गतवति कृतवेशे केशवे कुञ्जशय्यां । रचितरुचिरभूषां दृष्टिमोषे प्रदोषे स्फुरति निरवसादां कापि राधां जगाद १ विरचितचाटुवच
नरचनं चरणे रचितप्रणिपातं । संप्रति मञ्जुलवञ्जुलसीमनि केलिशयनमनुयातं १ मुग्धे मधुमथनमनुगतमनुसर राधिके ॥ ध्रुव ॥ घनजघनस्तनभारभरे दरमंथर
चरणविहारं मुखरितमणिमञ्जीरमुपैहि विधेहि मरालनिकारं २ शृणु रमणीयतरं तरुणीजनमोहनमधुरिपुरावं कुसुमशरासनशासनवंदिनि पिकनिकरे भज भा
वं ३

विशेषणं घनेति । घनयोर्निबिडयोः जघनस्तनयोर्भरस्य भारेण हेतुना मन्थरो दृशि मरालानां हंसानां स्वकीयमंथरचरणेन मञ्जीरादिशब्देन च निकारं विधेहि कुरु । हंसनिनादे भ्रम
काममानेषु सत्सु मञ्जीरादिध्वनिरपि मरालशब्दे नैव लोकैर्ज्ञायते इति भावः योऽपि मिलति तत्र इति ध्वनिः । शृणवन्ती हे अत्र यापायामपि भंगुरपनीतिगमनं इति विलंबेन कार्यं इत्यपि ध्व
नितं तत्कुत्र वसंतरागे । कामस्तु सर्वास्वपि दर्शनेन हंसस्य गच्छतेन च सर्वसिद्धिरिति मरालो हंसः राजहंसस्तु रागेऽपि हंसमात्रं कविनिधाने । निकारः स्यात्परिभवे धान्यस्योत्किरणेऽपि
चेति विश्वः २ शृण्विति तरुणीजनानां मोहनं मोहजनकं मधुरिपोः कृष्णस्य रावं शब्दं तत्र त्वा शृणु कीदृशं रमणीयतरं रमणीयजनानामतिशयेन रमणीयं पिकनिकरे को
किलसमूहे कुसुमशरासनशासनवंदिनि सति कुसुमान्येव शरासनं धनुर्यस्य स कामः तस्य शासनस्य आज्ञायाः वंदिनि स्तुतिपाठके सति । यद्वा कुसुमशरासनशासनवंदि
नं स्मरस्य कुसुमशरासनस्य आज्ञाकारिणि सतीत्यर्थः भावमनुरागं कुरु भज शृणुत्प अत्र पिकनिकरझंकारेण कृष्णमधुरालापस्य परैरलक्षितता आदीपनि । कोकिलाभि
न्नपिवेणुतरंगमयाः सती श्रोत्रमलीनिध्वनितं पिकस्य मधुरस्वरे मात्रा माधुर्ये कुत्र मिलित्वा विध्वनितं वंदिनः स्तुतिपाठकाः इत्यमरः २

अनिलेत्यादि हे करभोरु करभः कनिष्ठाद्यामणिबंधपर्यन्तं करस्य बहिर्भागः तद्वदूरू यस्याः तत्सम्बुद्धौ गतिमन्थरं इति विलंबं कालक्षेपं मुंच अनिलतरलकिसलयनिकरे
णकरेण निलेनवायुना तरलश्चंचलो यः किशलयनिकरो नवपल्लवसमूहः स एव करः तेन लतानिकुरंबं लतासमूहं प्रेरणमिव करोति । किशलयकम्पच्छलेनास्माकमाह्वा
नमसत्मानो लतासमूहो विलंबं प्रेरयतीति भावः । अन्यदप्येकपल्लवेनकथादिदर्शनेन यात्रायां फलसिद्धिस्तवैकमित्यतो गमनं इति विलंबेन कार्यं इति ध्वनितं आकुरु धाव
नतुक्तं वामे मधुरवायकरी दक्षः पल्लवितो यः अनुकूलो वलयः तुषवत्तु स्मरस्य कल्पं इति सकल हे निवह सूहनिकरं विनष्टप्रियां भणितिबाधां अकनिष्ठं करस्य करभो बहि
रित्यमरः ४ स्फुरितमित्यादि अमुं कुचकुंभं स्तनकलशं पृच्छ सदस्य वदनी नितिवं कुरु कीदृशं स्फुरितं सकम्पं कस्मादिव अनंगतरंगवशादिव अनंगस्य कामस्य तरंगऊर्मिः
कृपादिव अत्रानंगतरंगवशादित्यनेन तस्यास्तरंगिनीत्वमादिष्यते अन्योऽपि कुंभो नाधानरंगैः पूर्णमानः सकम्पो भवतीत्यपमति न कुचकुंभस्तु धीरस्तरंगिण्या अनंगतरंगैः
प्रेरणादिव सकम्प इति भावः इवशब्दोऽत्र साधोनकः पुनः कीदृशं मनोहरो योऽहारः स एव विमला निर्मला जलधारा यस्मिन् तादृशं अत्रापि परिस्थितस्य हारस्य जलधारात्वनि
रूपणात् तनस्य पूर्णकलशत्वमाविष्कृतं पूर्णादेव कलशान्तरंगैरान्दोलनेन निवर्ज्जितधारा निःसरणसंभवात् पुनः कीदृशं सूचितो हरेः कृष्णस्य परिरंभ आलिंगनं येन तादृशं नारीणा

अनिलतरलकिशलयनिकरेण करेण लतानिकुरंबं प्रेरणमिव करभोरु करोति गतिं प्रति मुंच विलंबं ४ स्फुरितमनंगतरंगवशादिव सूचितहरिपरिरंभं पृच्छ मनोहरहारविम
लजलधारममुं कुचकुंभं ५ अधिगतमखिलसखीभिरिदं तव वपुरपि रतिरणसज्जं चंडि रणितरसनारवडिंडिममभिसर सरसमलज्जं ६ स्मरशरसुभगनखेन स
खीमवलंब्य करेण सलीलं चल वलयक्वणितैरवबोधय हरिमपि निजगतशीलं ७ श्रीरामनारायणवासुदेवेतिः ॥ ८

स्तनकंपः प्रियसंगस्य सूचनीति शकुनिकास्तु तस्य निजेष्टस्यार्थः स्तने कंपः प्रियसंगमसूचकः इत्यादिकलशत्वेन स्तननिरूपणं अपि यात्रायां पूर्णकलशदर्शनं शुभजनकं तेन तायेति ५ तत्तु सखी
जनेषु पृच्छन्तु कथं मया गन्तव्यमित्यत आह अधिगतमित्यादि इदं तव वपुः सखीभिरधिगतमेव ज्ञातं निरणायेन रतिरणाय युद्धसंग्रामाय सज्जं कृतानेकरणादिकं विधानमधिगतं ज्ञातं तथापि सखीभिरिदं
मेवाधुनापि किं विलम्बेनेति भावः यद्वा सखीभिरिदं तव वपुः वर्त्तुधारयितोऽसज्जमधिगतं तथापि तना सांकालज्जेति भावः अन्योऽपि शत्रुकोपनेऽसिनः शस्त्रवतानः सुनोरसनारवलि कल्पांदि
कयो न्वेव डिंडिमो वाद्यविशेषो यत्र एवं यथा स्यात् एवमभिसर कृष्णं केनामृति गच्छ अन्यत्रापि रणे डिंडिमस्तथा रन्तव्य एवेति ध्वनिः पुनः कथं यथास्यात्सरसं सरसं रसः शृंगाररसस्तेन स
हितं अलज्जा सहितं यथा स्यात् ६ स्मरेत्यादि करेण सखीमवलंब्य चल गच्छ हितं न वा सूत्रादेवं चल गच्छ कीदृशेन करेण स्मरस्य शरा इव सुभगाः सुंदरा नखा यस्मिन् तेन अलसि
तं सलीलं यथास्यात्तथा चल हरिमपि निजगतिशीलं त्वदीयं वलयक्वणितैः कंकणरवैः हरिमपि निजं स्वकीयं गतशीलं गमनस्वरूपमवबोधय ज्ञापय अन्यत्रापि विनम्रीकृ

२९

श्रीजयदेवेत्यादि। इदं श्रीजयदेवेन भणितं कथितं हरिविनिहितमनसां हरौ विनिहितं न्यस्तं मनो येषां तेषां विरामं ... कंठदीधिति ... इदं शोभमानमित्यर्थः। कीदृशं मधुरीकृतः ...
... पुनः कीदृशं ... तारामधनेन तादृशं ... तदेव विहारस्थानं ... ततः नवनिकुंजमंदिरे पूर्ववत् ...
... कथितेन सम्यक्तया ... वर्णितं ... सर्ववृत्तस्य ... संपाद्य ... यथा ...
... हरिणा ... श्रीनिवास ... इत्यर्थः ... इति चिंताकुलः ... निकुंजे त्वां ... ध्यानेन ...
... पुलकपरिकलितानंदं ध्यानं दधानो भवति तथा ध्यानेन ... ध्यानेनैव तथा निगूढं परिकल्पनाधर्मेण ... भवतीत्यर्थः। पश्चात् ध्यानेनैव ...
... तद्ध्यानविरहे ... पश्चात् केलिं कृत्वा ... निःश्वस्य ध्यानं करोति
पश्चात् ध्यानविच्छेदे ... मूर्छां प्राप्नोति। १। ननु संकल्पस्य चेतसां विधायकं ... इत्यादि ... अभिसारं कुर्वंतीत्य

श्रीजयदेवभणितमधरीकृतहारमुदासितरामं। हरिविनिहितमनसामधितिष्ठतु कंठतटीमविरामं॥ ८॥ सामां इत्यादि ... निस्सारकथां ... आलिंगने प्रीतिं ... निरंतरमेव
विसमागमेति चिंताकुलः सत्वां प्रति वेपते पुलकयत्यानंदति ... निमूर्छति ... निकुंजे पुरः॥ १॥ ... निक्षिपदंजनं श्रवणयोः तापिच्छ
गुच्छावलीं मूर्ध्नि श्यामसरोजदाम कुचयोः कस्तूरिकापत्रकं। धूर्तानामभिसारसाहसहृतां विष्वङ्निकुंजे सखि ध्वांतं नीलनिचोलचारु सुदृशां प्रत्यंगमालिंगति॥ २॥ का
श्मीरगौरवपुषामभिसारिकाणामाबद्धरेखमभितो रुचिमंजरीभिः। एतत्तमालदललीलतमं तमिस्रं तत्प्रेमहेमनिकषोपलतां तनोतु॥ ३॥ ॥

तमभिसारसाहसहृतः तासामेव धूर्तानां ... अभिसारिकाणां ध्वांतं तमः कुंजे विष्वक् सर्वतः ... प्रत्यंगमालिंगति ... किं कुर्वत् ... अंजनं निक्षिपत् ...
... श्रवणयोः ... गुच्छावलीं ... मस्तके ... श्यामसरोजदाम ... निक्षिपत्। कुचयोः कस्तूरिकापत्रकं ...
... निक्षिपत् ... नील निचोल ... इत्यादि ...
... अभिसारिका ... इति ... कश्मीरेत्यादि ...
... रुचिमंजरीभिः ... तमालदल ... तमिस्रं ... निकषोपलतां ...
... निकषोपलतां ... तनोतु ... सुवर्णरेखेव ...

३०

हारावलीत्यादि। अथानंतरमिमं ... राधामिति ... कीदृशीं सखी निकुंजनिलयस्य निकुंजमेव निलयो ... हरिं निरीक्ष्य ... एतस्यैव ...
... कीदृशस्य निकुंजनिलयस्य ... कांचनकांचिदाम ... मंजीर नूपुर
कंकण ... इत्यादि ... इति। ४। तदेव गीतेनाह। मंजुतरेत्यादि। ...
द्वितीयकः नालः ... हे राधे माधवसमीपं ... मंजुतरकुंजतलकेलिसदने मंजुतर ... निकुंज अभ्यंतर ... केलिसदने ...
विलसविलासं कुरु। त्वं कीदृशि ... सुरतेन ... वदनं ... प्रविश राधे माधवसमीपमिह विलस ... मनुवर्तमान ... पद्यं॥

हारावलीतरलकांचनकांचिदाममंजीरकंकणमणिद्युतिदीपितस्य। द्वारे निकुंजनिलयस्य हरिं निरीक्ष्य व्रीडावतीमथ सखी निजगाद राधां॥ ४॥ मंजुतरकुंजतलकेलिसदने
प्रविश राधे माधवसमीपमिह विलस रतिरभसहसितवदने॥ १॥ नवभवदशोकदलशयनसारे प्रविश राधे माधवसमीपमिह विलस कुचकलशतरलहारे॥ २॥ कुसुमचय
रचितशुचिवासगेहे प्रविश राधे माधवसमीपमिह विलस कुसुमसुकुमारदेहे॥ ३॥ श्रीराधारमणाय नमः॥ श्रीनंदनंदनाय नमः॥

हे माधवे विलस कीदृशे माधवे मंजुतरे ... केलिसदने ... पुनः कीदृशे रतिरभसहसितवदनं ... १ कीदृशे केलिसदने नवं ... अशोक
दलशोक ... शयन ... कीदृशि कुचकलश ... तरलहारे ...
... नवभवदशोक ... शयनसारे ... २ कुसुमचयेत्यादि हे राधे कुसुमचयेन ... वासगेहे ...
... विलस ... कुसुमचयेन रचितं ... कुसुमवत् सुकुमारः कोमलो देहः ...
... हे माधवे विलस कीदृशे माधवे कुसुमचयेन रचितं ... वासगेहे ... पुनः कीदृशे माधवे कुसुमवत्सुकुमारदेहे ... इति विन्द्यः॥ ३॥

कुसुमशयनेत्यादि। हे राधे माधवसमीपं चलइज। इह केलिसदने श्रविशाविलसत्। कीदृशे केलिसदने मलयपवनबीधीपःपवमानपातुलितसुरभिभानेव ... विविधपुष्पं ... लोपोमलयजःपवनस्तेन सुरभीभवतीत्यर्थः। चलेत्यनेन ईषच्चञ्चलत्वं तेन मांसलकं। त्वं कीदृशी रतिविलसितललितगीते, रतौ वनितेमनोहरं ललितगीते ललितमिति विशेषणं तत्वय। स्मात्तादृशि। यद्वा इह माधवे विलस। कीदृशे ते वलितं मनोहरं चलितं भक्तं गीतं यस्मात्तादृशे। किंविस्तरमवलितेति पादः ललितकलत्तरणं नु। नानाविधमनोहरपीत्यभावं च मनोहरं। मनरचेहितं ललितं ललितं संश्वसते। ४। विततेत्यादि हे राधे माधवसमीपं श्रविशकेलिसदने विदने चिरं विलसत्। कीदृशे केलिसदने वितते बहुलीकृते रविर्निर्गतीनां सुमनानां नवपल्लवैर्व नेसांद्रे। कीदृशि त्वं मृदुलसपीनजघने श्लिष्टसेवीपीने मांसले जघने यस्यास्तादृशि। ५ मधुमुदितेत्यादि। कीदृशे केलिसदने मधुनो पुष्परसेन मुदितानामानंदितानां निपातानां मधुपकुल्लानां निभृतरसमूहैस्तैः कलितो विहितो रवः। शब्दो यस्मिंस्तस्मिन्। त्वं कीदृशि मदनरसरभसभावे। मदनस्य योरसःशृंगारस्तस्मिन्नवीनरभसोऽत्यंतसाह्लादनीनो ललितो भावो यस्यास्तादृ

चलमलयपवनसुरभिशीते। श्रविशराधे माधवसमीपमिह विलसरतिवलितललितगीते। ४। विततबहुवल्लिनवपल्लवघने। श्रविशराधे माधवसमीपमिह विलसपृथुलमपीनजघने। ५। मधुमुदितमधुपकुलकलितरावे। श्रविशराधे माधवसमीपमिह विलसमदनरसरभसभावे। ६। मधुरतरपिकनिकरनिनदमुखरे। श्रविशराधे माधवसमीपमिह विलसदशनरुचिरुचिरशिखरे ७ श्रीमाधवगिरिधरलालगोपालवासुदेव॥ ॥श्रीः

शि। यद्वा हे राधे इह माधवे विलस। कीदृशे माधवे मदनरसेन योरभसस्तेनोपलक्षितो भावो यस्य तस्मिन्। यद्यपि मधुपेनानेनैव मधुपानकर्तृत्वं प्राप्तं तथापि इदानीं मधुपानप्राप्तये मधुमुदिते इत्युक्तं ६ मधुरतरेत्यादि। कीदृशे केलिसदने मधुरतरो निशायेन मधुरो यः पिकनिकराणां कोकिलसमूहानां निनदः शब्दस्तेन मुखरे वाचाले यद्वा यद्वेन्दुर्यद्राधे इत्यस्यैव विशेषणं तदा मधुरतरः पिकनिकराणां निवधो निनदः सुराणां कूजितं तेन मुखरेत्यर्थः पुनः कीदृशि दशनरुचिरेव हंतकांतिरेव रुचिरं शिखरं माणिक्यविशेषो यस्यास्तादृशि अथवा दशनरुचिरुचिरशिखरे दशनस्य रुचिः कांतिः सैव दशनस्य शिखरं यस्याः सा तादृशि। यद्वा इह माधवे विलस। कीदृशे माधवे दशनरुचिरुचिरशिखरे दशनस्य कांतिरिति हरिनीयमाख्याने धृतिवत्सशिखरा यस्यो पमेयत्व पाविपर्यासो विपर्यासोपमा बोध्या। नयुक्तं दंडिना। नदानननिवो निंद्रमरविंदमभूदिति सा विपर्यासा द्विपर्यासोपमिष्यतइति। यद्वा दाडिमबीजाभं माणिक्यं शिखरं विदुरिति श्रा

विहितेत्यादि। हे मुरारे जयदेवकविराजराजे जयदेवोयः कवीनां राजराजः सर्वभौमस्तत्र मंगलशतानि कल्याणशतानि कुरु। कीदृशो भक्तेन विनयगुणात्वदति पुनः कीदृशो विहितः पद्मावत्या सुखसमाजः सुखसमूहो येन तादृशो। एतत्पद्मावतीन्यस्त्वकथनेन पत्न्याविष्टव्यंजनितं राजराजः कुबेरस्तद्वत्सार्वभौमे सुधाकरस्तेनिविष्टः ८ हृदयस्योत्कंठाधिक्यमाह, त्वामित्यादि। अयं कृष्णस्त्वां चित्तेन मनसा बहु धारयन् चिरं बहुकालं आप्य अतिश्रांतो मर्थः स्मरपुत्रो जातः कंदर्पेण अस्माभिः यथेन तापितः संतापितः, तत्तिदृष्ट्वा चित्तेपीनस्तनवद्बिंबाधरोष्ठं नश्यमेयुक्तं एव। स्मरोविवेकः कुतः मारो हृत्वं करोति तस्मात्पातिश्रमो भवतीति भावः तस्मात्त्वं सुधापानेन नूनं बाधसंकरं विंबाधरं विंबफलसदृशं मधरमेततत्पानुमि च्छति। तस्माद्धेतो त्वं मुक्तं स्यात्क्रोडं तनं त्वनलं तन्नयमपि कुरु। तत्र राधोऽनलदंकारो हृतो विनेमीत्याह भूतैयेति इह हृदयेकुतः संभ्रमः कीदृशेऽपत्ने विनंत्वदीयपदांभोजं त्वदीयचरणकमलं येन तस्मिन् अनएवदास इव सेवक इव अत्र हेतुः भूतेपस्यपालस्त्रीः सम्पत्सु पयोनत्वोसेभा सेन भीते अंकरेनानुसंबाधइत्यमरः लवलेशकालवइतिव १ से त्यादि। सा राधा निकेतनं लीलागृहं श्रविवेशश्रविष्टा किं कुर्वती मंजुमनोहरो यो मंजीरो नूपुरस्तस्य सिंजान्नं शब्दं कुर्वती कथंभवासात् सखास्वसं साध्यमसह्निमानंदसाहितं यथा

विहितपद्मावतीसुखसमाजे कुरु मुरारे मंगलशतानि भणतिजयदेवकविराजराजे ८ त्वां चित्तेन चिरं वहन्नयमतिश्रांतो भृशं तापितः। कंदर्पेण तु पातुमिच्छति सुधासंबाधविंबाधरं तस्मादंकमलं कुरु क्षणमिह भ्रूक्षेपलक्ष्मीलवक्रीते दास इवोपसेवितपदांभोजे कुतः संभ्रमः १ सा ससाध्वससानंदं गोविंदे लोललोचने। शिंजानो मंजुमंजीरं प्रविवेश निकेतनं। २ राधावदनविलोकनविकसितविविधविकारविभंगं। जलनिधिमिवविधुमंडलदर्शनतरलिततुंगतरंगं। १ हरिमेकरसं चिरमभिलषितविला सं। सा ददर्श गुरुहर्षवशंवदवदनमनंगविकाशं। धु॥ ॥

स्तात्। कीदृशी सा गोविंदे लोले साध्वसेन कंपने लोचने यस्याः सा। २ राधावदनेत्यादि गीतस्यास्य वरारीरागो रूपकतालः। गीतार्थस्तु सा राधा हरिं ददर्श दृष्टवती। कीदृशमेकरसमेको मुख्यः शृंगाररसो यस्य तं। एकस्मिन्नेव रसोऽत्यंतप्रेम तं राधया यादृशः शृंगाररसः कृष्णस्यापि तादृश एवेति भावः पुनः कीदृशं चिरं बहुकालं आ भिलषितो वांछितो विलासः केलिर्येन तं पुनः कीदृशं गुरुर्महान् योहर्ष आनंदस्तेन वशंवदमायत्तं वदनं यस्य तं पुनः कीदृशम् अनंगविकाशसदृशं क्वचिदनंगविकाश इति पाठः तदानंगस्य कामस्य विकाशः स्फूर्तिर्यत्र तं राधेति पुनः कीदृशं राधायाः वदनं तस्य विलोकने न विकसिताः प्रकटिताः विविधा नानाविधा विकाराः भावा अंगक्षेपणकरविमर्दादिरूपास्त एव विभंगा विशिष्टोर्म्मयो येन तं, कमिव जलनिधिमिव समुद्रमिव कीदृशं जलनिधिं विधुमंडलस्य चंद्रमंडलस्य दर्शनेन तरलिताश्चंचला नाच्चं ... तुंगा उन्नताः तरंगा ऊर्मयो यस्य तं। अत्र अंगारस्य ... भाश्रयत्वेन कृष्णस्य जलनिधिसाम्यं राधायास्तु आह्लादकारित्वादिना चंद्रसाम्यं भुजंगमादिरूपविकारस्योन्नतोन्नततरंगसाम्यं ध

वि विधविकारानेवाह. हारमित्यादि. कीदृशं हरिं विदूरमतिशयेन परिरभ्या लिंग्य उरसि वक्षसि हारं विदधतं बिभ्राणं। कीदृशं अतिशयेन विमलस्तारः शुद्धमौक्तिकं यस्य तादृशं
कमिव स्फुरतरः प्रकटतरो यः फेनकदंबः फेनसमूहः तेन करंबितं मिश्रितं यमुनाजलपूरं कालिंदीप्रवाहमिव अत्र हरेः श्यामशरीरस्य श्यामतया यमुनाप्रवाह
साम्यं। हारस्य चातिशुभ्रत्वेन फेनसमूहसाम्यं। अत्र हारालिंगनेन स्वाभिलाषप्रकटनात्मा दापितः कोऽपि हारो न तिष्ठति। स्वाभिलाषप्रकटितं कोऽदापितं मितीरितं मि
श्रितं कर्बुरितं. ... हिमोक्तिके। ... यमुनेत्युत्प्रेक्ष्यते इति विभ्रमः। २ पुनः कीदृशं श्यामलं नीलं मृदुलं कोमलं कलेवरमंडलं
यस्य तं। पुनः कीदृशं अधिगतं परिधृतत्वेन प्राप्तं गौरं पीतं दुकूलं पट्टवस्त्रं येन तं। कमिव नीलनलिनमिव श्यामकमलमिव। कीदृशं नीलनलिनं पीतो यः परागः पुष्प
रेणुस्तस्य पटलं समूहस्तस्य यो भरोऽतिशयस्तेन वलयितं वेष्टितं मूलं यस्य तं। अत्र हरेः श्यामशरीरस्य श्यामकमलसाम्यं पीतपट्टांबरस्य च मूललग्नपीतपरागसा
म्यं। ३ पुनः कीदृशं तरलो यो दृगंचलः कटाक्षस्तस्य चलनेन मनोहरं सुंदरं यद्वदनं तेन जनितः उत्पादितो रतिरागो राधायाः सुरतेच्छा येन तं। कमिव शरदि शरत्काले स्फु

हारममलतरतारमुरसि दधतं परिरभ्य विदूरं। स्फुटतरफेनकदंबकरंबितमिव यमुनाजलपूरं। २ श्यामलमृदुलकलेवरमंडलमधिगतगौरदुकूलं। नीलनलिनमिव
पीतपरागपटलभरवलयितमूलं। ३ तरलदृगंचलचलनमनोहरवदनजनितरतिरागं। स्फुटकमलोदरखेलितखंजनयुगमिव शरदि तडागं। ४ वदनकम
लपरिशीलनमिलितमिहिरसमकुंडलशोभं। स्मितरुचिरुचिरसमुल्लसिताधरपल्लवकृतरतिलोभं। ५॥ ॥

टकमलोदरे विकसितपद्मगर्भे खेलितं क्रीडितं खंजनयुगं खंजरीटयुगलं यत्र तादृशं तडागमिव। अत्र हरेस्तस्य राधादर्शनात्संकमिताशयत्वेन शरत्कालीनखंजनयुगमिव शरदि
तडाग साम्यं। स्मितमुखस्य च विकसितपद्मसाम्यं नारकाश्यामिकोपेनत्वेन परितः। ... नयनयोः खंजरीटसाम्यं। शरत्काले अलाभस्य कमलगर्भे
खेलनं खंजनो दृष्टः ... शरत्कालीन कमलमध्यस्थखंजनोपमानेन
ध्वनितं. ... दधिपात्रधान्यकूटेषु शोभनी ... खंजरीटस्तु खंजन इत्यमरः। तत्र
... ४ पुनः कीदृशं वदनकमलस्य परिशीलनाय प्रकाशनाय यौ मिलितौ ... कुंडले ... शोभा कांतिर्यस्य तं। अत्र कुंडल
योर्मार्तंडलिखचितत्वेन सूर्यौपम्यं बोध्यं ... विकर्तनार्क ... मिहिरारुणपूषाण इत्यमरः। पुनः कीदृशं स्मितस्य ... रुचिः कांतिस्तया रुचिरं
... अधरपल्लवं ... राधायाः रतिलोभं सुरतेच्छा येन तं। ५॥

पुनः कीदृशं शशिकिरणैश्छुरितः कर्बुरितः ... जलधरस्तद्वत्सुंदरं सकुसुमाः कुसुमयुक्ताः ... केशा यस्य तं ... केशानां श्यामतया जलधरसाम्यं अत्र
... पुनः कीदृशं तिमिरे अंधकारे उदितं प्रकटितं ... निर्मलस्य मलयजतिलकस्य निवासो विन्यासो यस्य तं अत्र हरेः
श्यामपत्ने ... पुनः कीदृशं विपुलो यः पुलकभरो रोमांचा
... पुनः कीदृशं मणिगणानां मणिसमूहानां किरणसमूहेन सम
... कीदृशं सुकृतोदयस्य पुण्योदयस्य सारं सारभूतं ... श्रीजयदेवेत्यादि हे जनाः प्रणमत॥

शशिकिरणच्छुरितोदरजलधरसुंदरसकुसुमकेशं। तिमिरोदितविधुमंडलनिर्मलमलयजतिलकनिवेशं। ६ विपुलपुलकभरदंतुरितं रतिकेलिकलाभिरधीरं। मणिगण
किरणसमूहसमुज्ज्वलभूषणसुभगशरीरं। ७ श्रीजयदेवभणितविभवद्विगुणीकृतभूषणभारं। प्रणमत हृदि विनिधाय हरिं सुचिरं सुकृतोदयसारं। ८ अतिक्रम्यापांगं
... विपासंपृक्तं ... सात्मा ... सरसमाकूतसुभगं ... जातलज्जा विगम ... इति श्रीगीत
गोविंदे सानंददामोदरो नामैकादशः सर्गः ११॥ ॥

द्विगुणीकृतो भूषणभारो येन तं ... जयदेवसरस्वती ... भवद्गुणवर्णिनी ... ८ अतिक्रम्येति ...
देवीं ... क्रमतापालनात् ... वृत्तान्तं ...
जनः सखीपरिजनः ... कपटं ...
विहितं ... कथं ... कीदृशं ... पुनः कथं
... पुनः कीदृशं ...
... इति श्रीगीतगोविंदटीकायां ... विरचितायां ... एकादशः सर्गः ...

गतवतीत्यादि। हरिः प्रियां राधामुवाच। कथमिति सखीवृंदे सति तस्मिन् हे गतवति सतीति। कीदृशीं मंदत्रपाभरेति मंदः क्रोधपत्रपाभरेण लज्जासमूहेन निर्भरे हि मितो व्याप्तः स्मरः कामः तस्य वशः
नतया रुपया कूनो मिश्रमलेन स्फीतं श्वबढ्ढं मन्स्मितं तेन स्नपितो व्याप्तो बधरो यस्यास्तां। पुनः कीदृशीं सरसमनसं रसोनुरागस्तेन सहितं मनो यस्यास्तां। किं कृत्वा
वश्रमापने नवपुष्प किशलयशयने निक्षिप्तां स्थापितां निहितेन पतनां दृशौ विलोक्य विलोकनेन संभोगेच्छाधुना नये। १। किशलयेति। गीतस्यास्य विभासराग एकतालीता
लः। गीतार्थस्तु। हे राधे त्वमधुना नारायणमनुसरहे कामिनि किशलयशयने तले चरणकमलं विनिवेशं चरणपद्मार्पणं कुरु। इदं सुवेशमपि सम्यक् शुक्लादि
सुरम्यं हन्तं यदि किशलयशयने नवपद्मपल्लववैरिपराभवं नवपदपल्लवएव यो वैरी शत्रुस्तस्मात् पराभवं पराभवमनुभवतु। यद्वा इदं किशलयशयनं पराभवमनुभवतु। कीदृशं
नवपदपल्लववैरि नवपदपल्लवस्य विरोधीत्यर्थः १। करकमले त्यादि। अहं करकमलेन निजकरांबुजेन तव चरणं करोमि संवाहयनुमर्थान्। यद्वा चरणमहमिमे कृतेनुपदं

गतवति सखीवृंदे वंपाभरनिर्भरस्मरपरवशाकूतस्फीतस्मितस्नपिताधरां सरसमनसं दृष्टिं दर्शयन्सुकुन्दवपल्लवशस्तशयने निक्षिप्तां सुवक्त्रां हरिः प्रियां। १। किशलयश
यनतले कुरु कामिनि चरणनलिनविनिवेशं नवपदपल्लववैरिपराभवमिदमनुभवतु सुवेशं। १। क्षणमधुना नारायणमनुगतमनुसर राधिके। ध्रु। करकमलेन करोमि
चरणमहमागमितासि विदूरं क्षणमुपकुरु शयनोपरि मामिव नूपुरमनुगतिशूरं। २। वदनसुधानिधिगलितममृतमिव रचय वचनमनुकूलं। विरहमिवापनयामि पयोधर
रोधकमुरसि दुकूलं। ३॥ ॥

तथा च करकमलेन तव चरणयोर्मर्दनं स्पर्शमावाहनादिरूपां करोमि। कथमित्याह। आगमितेति त्वं विदूरमतिशयेनागमितासि अतीतासर्थान्तया। तथा च दूरागमनजनितं श्रममपनु
नयामीति भावः। शयनोपरिशय्यायां उपरि क्षणं नूपुरमुपकुरु नूपुरस्य परिधानेन महोर्षतापादनमेवोपकारः कीदृशं नूपुरमनुगमनिसूरं अनुगतौ नवानुसरणम् सूरं अपरो विभो
गतिस्फूर्ति तोरवं निःक्षिपत्स्फुरितमेवेति भावः। मामिव यथाहमनुगामीति नादिनोपकरोषि तथा नूपुरमुपकुर्वतीत्यर्थः २। वदनेत्यादि। हे प्रिये अनुकू
लं वचनं रचय। कीदृशं वदनमेव सुधानिधिश्चंद्रस्तस्माद्गलितं सुतं किमिव अमृतमिव। अनन्तं स्वया प्रवासयनूचास्योरसि हृदये दुकूलं पट्टवस्त्रं अपनयामि कीदृशं
पयोधरयोः रोधकं निरोधात्मकं। कमिव विरहमिव यथा त्वद्विरहोमयापनीतस्तथा दुकूलमपनयामीत्यर्थः। विरहपक्षेपयोधरयोर्...निरोधकम् ॥ ३ ॥

प्रियेत्यादि हे राधे मधुरतिमहत्तमिकुचकलशं विनिवेशयार्पय कीदृशमुनिडुरवापम् अतिदुर्लभं पुनः कीदृशं पुलकितं ... प्रियपरिरंभरभसवलितमि
वेति। प्रियपरिरंभे त्वालिंगने यो रभसः साहस्तेन वलितमिव पुलकमि अपरोपि यो हर्षयुक्तो भवति तस्य रोमांचो भवत्येवेति ध्वनिः। तेनालिंगनेन मम निजतापं कामाग्निजन्यं शोष
यताशय। ४। अधरेत्यादि हे भामिनि अधरसुधारसमधरसंबंधामृतरसमुपनय विनर दासं दासमनुगतं जीवय कीदृशं मृतमिव। अन्योपि मृतो अमृतपानेन जीवतीति ध्व
निः। मनसेहेतुः त्वयि विनिहितमनसं त्वय्यर्पितचित्तं पुनः कीदृशं त्वद्विरहरूपेणाग्निना दग्धं वपुर्यस्य तं अनएवाविलासं विलासरहितं योमनः स्यात्स निश्चेष्टोदग्धदेह
श्चस्यादिति ध्वनिः। ५। शशिमुखीत्यादि हे शशिमुखि चंद्रवदने मणिरसनागुणं मणिमुक्तं कांचीदामकलरवपक्षपातं कुरु। अनेन हंसलीलास्यं विपरीतरतमाभजस्वेति

प्रियपरिरंभणरभसवलितमिव पुलकितमतिदुरवापं मदुरसि कुचकलशं विनिवेशय शोषय मनसिजतापं ४ अधरसुधारसमुपनय भामिनि जीवय मृतमिव दा
सं त्वयि विनिहितमनसं विरहानलदग्धवपुषमविलासं ५ शशिमुखि मुखरय मणिरसनागुणमनुगुणकंठनिनादं श्रवणयुगले पिकरुतविकलेशमय
चिरादवसादं ६ मामति विफलरुषा विकलीकृतमवलोकितुमधुनेदं मीलितलज्जितमिव नयनं तव विरम विसृज रतिखेदं ७ श्रीजयदेवभणितमिद
मनुपदनिगदितमधुरिपुमोदं जनयतु रसिकजनेषु मनोरमरतिरसभावविनोदं ८ श्रीगोविंदापनमः॥ ॥ ॥ ॥

ध्वनितं कीदृशं मणिरसनागुणं अनुगुणकंठनिनादं अनुगुणः सदृशः कंठस्य कोकिलपक्षिणो नादः स्वनो यस्य तं रसनागुणानुकारिणं शब्दं कुर्वित्यर्थः अनेन शब्देन मम श्रवणयुगलेपि कोकिलपुंस्कोकिलस्य विराद्
वसादं चिरकालीनदुःखमपनयमपनायापि कीदृशोपि करुतेन कोकिलशब्देन विकलेदुःखिते ६। मामित्यादि हे राधे अवलोकितुं नवनयनं अधुना निमीलितं प्राप्नोति। किंविल
जितमिति को कीदृशं मुनि विफलरुषा निष्फलरोषेण विकलीकृतं विकलतां नीतं अधुनेदानीं विरम निष्फलरोषादित्यर्थः रतिखेदं रतेः संभोगस्य खेदं दुःखं त्वं वि
सृज ७। श्रीजयदेवेत्यादि इदं श्रीजयदेवेन भणितं कथितं रसिकजनेषु मनोरमा रतिरसभावविनोदं रतिसंभोगोपरतः शृंगाररसः भावाः संचारिसात्विकादयस्तेषां मनो
रमं विनोदं कौतुकं जनयतु। कीदृशं भणितं अनुपदं प्रतिपदं निगदितो मधुरिपोः कृष्णस्य मोदः आनंदो यत्र तादृशं ८ श्रीहरये नमः॥ ॥ ॥

श्मूह इत्यादि। जयोः राधामाधवयोः मनोको ज्ञरो नू तिनरां भोत्त नि मो मनो हरो शाभो यस्मैनादक्षः शृंगार क्रीडा विशेषवडून: विपंभावुकः श्रिमोवभूव: सकरस्मन स्माह। तस्मि
श्च तिनरां भे नि विज्रम्भे वे कर्ण्ये उलकांकुरेण रोमांचो जन्मेन श्मूहे विश्वो भूत। अथ चक्री डाकूत विल्लो किमः कीडस्त्र पेदाकून पूर्वक मभिशापमर्दकं विस्रो किनं नभ्रि
मेषाणे नृस्वं देन न श्मूहो भूत। अधरसुधापाने च अधरा मृत पाने कृ पानर्मभिः कृपा कौतुकेः श्मूहो भूत। अथ च मन्मथक पापुष्ठे मन्मथ कपापां कर्णं आयां
स्मपुष्ठे विश्रुरनेव। आनंदाधि गमेना नंद प्राप्त्या श्मूहो भूत। १। दोर्भ्यां मित्यादि। दोर्भ्यां वाहुभ्यां मर्यो द्वायपात्तं यमितो वक्षः। अथ च तयेव पयो धर भरेण गत्तन भारे
णापी डितः। अथ च मयापाणिजैर्नखैरा विद्धस्ताडितः। अथ च नपादशनैर्दंतैः त्तताधरपुटः त्ततो दष्टो धरपुटो यस्य सत्ततधरपुटः कृतः। अथ च तयाश्रोणीतटे
न नितं व विवेदाहतः आस्फालितः। अथ च तया हस्तेनानमितः कचे केशे धृत्वेत्यर्थः। ततो धरमधस्पंदेनाधरमधरस्य स्यंदेन संमोहितः एवं विशिष्टोपिकांतः का

श्मूह: पुलकांकुरेण नि विज्रम्भे वे निमे षेण चक्री डाकूत वित्तो किने धरसुधापाने कपानर्मभिः। आनंदाधिगमेन मन्मथक पापुष्ठे विपश्चिन्न भद्र डून: स्तनपोर्व
भूव तत्ति नरं भः विपंभावुकः। १। दोर्भ्यां संयमितः पयोधर भरेणापीडितः पाणिजैराविद्धो दशनैः त्ततधरपुटः श्रोणीतटे नाहतः हस्तेनानमितः कचे धर मधुस्यं
देन संमोहितः कांतः कामपितृ निमाप्नतद्दोकामस्य वामागतिः। २। काराके। निके ति संकुलरणारंभेन या लाहर्षपं कांतं जयाय किं विदु परि प्रारंभि यत्तं
प्रमान्। निस्पंदा जघनस्थली शिथिलिता दोर्वल्लिरुत्कं पितं वक्षो मीलितमत्तिपौरुषरसः स्त्रीणां कुतः सिध्यति। २। ॥२॥ ॥

नन्य निर्वत्तनीयांत्त निमायश्चापर तद्वेनो रहो कृत्वा श्वर्ये काम स्य वामागतिः विरुद्धागतिः यस्य तं धनादिकं क्रियते सैवनितं प्राप्नोति। अपूर्वं तत्राद्भुतो विपरीतं द्रामवा नि निको २४
मस्य विरुद्धेवरी तु रितिभावः २ काराके इत्यादि मसायु कामस्यां के विके पुष्प पुष्पैर्मारस्य मरणस्य चित्रे रति के लि संकुल रणारंभे रति के लि भिक्षं वना लिंगनता नावं धरू
पाणिः संकुले आनेरणारंभे कामयुद्धारंभेन या राधया साहस प्राणे साहस वडुल कांतं जयाय उपरिकांत स्योपरि किं चित्र लोको त्तरं प्रारंभि पुरुषायितमारब्धं यत्संभ्रमान्
संवेगात् तस्या राधाया जघनस्थली निस्पंदी निश्चला जाता दोर्वल्लिर्वाहु लता शिथिलिता स्थली भूता। वक्षो हृदयमुत्कंपितं अत्तिमी लितं नूडितं। ततः स्त्रीणां पौ
रुषरसः पराक्रमाभिलाषः कथं सिध्यति पिनु न सिध्य वेत्यर्थः। मारो न तो भिवनेते नि क्षिप्तः [illegible] ॥२॥

तस्यां इति एतैः कामशरैः पञ्चदशोत्ते र्नेत्रयोः शांते नि स्त्रीतैर्युतो मूर्छितं विद्रुमभूदिति अश्रुतरूपं अन्य [illegible] भित्यर्थः केः कामशरैः तस्या
अधराः पाटलेन श्वेनरक्तेन पाणि ज्ञेन नूत्वेनां कित उरः निद्राकषाये निद्राकषायिते दृशौ लोचने च निर्धौताधरशोणिमा निर्धौतिश्च वैनालिंगना दिना शालितोधरस्य
स्य शोणिमा लोहित्यं नच्च मूर्धजाः केशाश्च कीदृशा विलुलितस्त्रजः विलुलिताः के शयनक्रदवकचुंवना दिदाने नमा नाजन एवमाल्याः शिथिलाः स्रजः पुष्पमाला
येषु तादृशा कांचीदाम च मेखला स्वं दरश्लथांचलं दरमीषत् श्लथं शिथिलमंचलं वस्त्रं ग्रंथं च ४ अथेत्यादि अनंतरे राधकांतं हृष्यं मं उन वांछया निजगाद रतिक्रां
नेतुरत खिन्न चित्रमपि निर्गता वाधापी डायस्याः सा राधा पुनः कीदृशी स्वाधीन भर्तृका स्वाधीनो भर्ता यस्याः साद्यं नायिका स्वाधीनभर्तृका अत्तेवाणं यस्या रतिगुणं ३६
णाकृष्टः पतिः पार्श्वे न मुंचति विचि त्र विभ्रमा सत्ता मास्या स्वाधीनभर्तृकेति ५ तदेवगीतेन कथयति कुर्वित्यादि गीतस्यास्य रामकरी रागे यतितालः गीतार्थस्तु सु
राधा यदुनंदने निजगादोक्तवती कीदृशे क्रीडति रममाणे पुनः कीदृशे हृदयानंदने हृदयानंदजनके किं निजगादेत्याह कुर्वित्यादि हे यदुनंदन हृद्य अत्र षिशिष्टं गरागे

तस्याः पाटल पाणिजांकित मुरो निद्राकषाये दृशौ निर्धौताधरशोणिमा विलुलितस्रस्तस्रजो मूर्धजाः कांचीदाम दरश्लथांचलमिति प्रातर्निखातैर्दृशोरेभिः काम
शरैस्तदद्भुतमभूत्पत्युर्मनः कीलितं। ४। अथ कांतं रतिक्लांतमपि मंडन वांछया निजगाद निराबाधा राधा स्वाधीनभर्तृका। ५। कुरु यदुनंदन चंदन शिशिरतरेण क
रेण पयोधरे मृगमदपत्रकमत्र मनोभवमंगलकलशसहोदरे १ निजगाद सा यदुनंदने क्रीडति हृदयानंदने ध्रुव० अलिकुलगंजनमंजनकं रतिनायकशाय
कमोचने त्वदधरचुंबनलंबितकज्जलमुज्ज्वलय प्रिय लोचने २ नयनकुरंगतरंगविकाशनिरासकरे श्रुतिमंडले मनसिजपाशविलासधरे शुभवेशनिवेशय कुंडले।

तत्र पयोधरे स्तने मृगमदपत्रकं कस्तूरीपत्रावलीं कुरु केन करेण कीदृशेन करेण चंदनशिशिरतरेण चंदनादपि शीतलतरेण कीदृशे पयोधरे मनोभवस्य कामस्य योमंगलकलशस्तस्य
सहोदरे सदृशे १ अलिकुलेत्यादि हे प्रिय लोचने मे त्वदधराचुंवनेन लंबितं गलितं कज्जलं तदुज्ज्वलय पुनर्दीपय नयनयोः कज्जलं पुनर
र्पयेत्यर्थः कीदृशे लोचने रतिनायकस्य कामस्य शायकान् बाणान् करोतीत्यर्थः यतिरतिनायकशायकमोचने तत्र कीदृशं कज्जलं अलिकुलस्य भ्रमरसमूहस्य पुंजनं ति
रस्कारस्तस्य जनकं विधायकं उज्ज्वलतो दीप्ति शृंगारविशदं दुपिकाया नी निविम्बः २ नयनकुरंगेत्यादि हे शुभवेश शोभनो वेशो यस्य कारणं तस्य संबोधनं ममश्रुतिमंडले कर्णदे
शे कुंडले विनिवेशयार्पय कीदृशे श्रुतिमंडले नयनएव यो कुरंगो मृगस्तस्य यो तरंगस्तस्य यो विकाशः प्रसरणं तस्य निरासकरे निरासकारिणि नयनयोर्दैर्घ्य विधायके
कान्ति अत्युत्तमा किं यद्वा नयो र्धः स्वादित्यर्थः पुनः कीदृशे मनसिजस्य पाशो बंधनविशेषस्तस्य विलासधरे तद्वल्लाभति॥ ॥३॥ ॥ ॥५॥ ॥

भ्रमरचयमित्यादि। मम सन्मुखे तु खेलद्विरंमनो हरमलकं चूर्णकुंतलं परिकर्मय परिष्कुरु। कीदृशमलकं नर्मजनकं क्रीडाजनकं। कीदृशे मुखे विमले निर्मले। पुनः कीदृशे जितक
मले जितं निरस्तं तस्य शोभया कमलं येन तादृशे। कीदृशमलकं सुचिरं चिरादुपरि छायम्योपरि स्थितं भ्रमरचयं भ्रमरसमूहं रचयंतं स्वकांत्या भ्रमरत्वं भ्रमं जनयंतमित्यर्थः
४। हे कमलानन पद्मानने शशिकर रजनीकरे ललाटे ललितं रजनीकरार्धं दलमिव तिलकं कुरु। कीदृशं तिलकं मृगमदरसवलितं मृगमदरसेन कस्तूरीरसेन
वलितं निर्मितं। पुनः कीदृशं विहितकलंककलं विहिता कलंकस्य कला शोभा येन तादृशं। अत्र कमलानने ति विशेषणेनाननस्य कमलविरोधिन्यलिकरू
प रजनीकरे मृगमदतिलकछलेन कलंककलादानमुचितमेवेति ध्वनितं। कीदृशेऽलिकरजनीकरे विश्रमितश्रमशीकरे। विश्रमितो विश्रामं प्रापितो यः श्रमस्ते
न जनितो शीकरो बुकणः यत्र तादृशे। अत्र भूतां स्वेदविंदुनाम निशीतनया हिमकणत्वमारोप्यते। तेन चालिकस्य चंद्रत्वमिति रूपणं सांगं निर्वहतीति ध्वनितं। ५

भ्रमरचयं रचयंतमुपरि रुचिरं सुचिरं मम सन्मुखे। जितकमले विमले परिकर्मय नर्मजनकमलकं मुखे ४ मृगमदरसवलितं ललितं कुरु तिलकमलिकरजनीकरे।
विहितकलंककलं कमलानन विश्रमितश्रमशीकरे ५ मम रुचिरे चिकुरे कुरु मानद मानसजध्वजचामरे। रतिगलिते ललिते कुसुमानि शिखंडिशिखंडकडा
मरे ६ सरसघने जघने मम शंबरदारणवारणकंदरे। मणिरसनावसनाभरणानि शुभाशय वासय सुंदरे ७ श्रीजयदेववचसि जयदे हृदयं सदयं कुरु मंडने। हरिचर
णस्मरणामृतनिर्मितकलिकलुषज्वरखंडने ८॥ ॥

लारमलकं शेषं ध्वनिसमरः ५। मम रुचिरे इत्यादि हे मानद [illegible] मम रुचिरे मनोहरे चिकुरे कुसुमानि कुरु रचय। कीदृशे चिकुरे मानसजस्य कामस्य ध्वजचामरे प
ताकाचिह्नभूते चामरे। पुनः कीदृशे रतौ सुरतसमये गलिते शून्यबंधने। पुनः कीदृशे शिखंडिनां मयूराणां शिखंडकस्य पिच्छस्य डामरस्तादृशे ६ सरसघन इत्यादि हे
शुभाशय शोभन हृदय मम सुंदरे जघने मणिमयी या रसना कांचीरशना वसनं वस्त्रं आभरणान्यलंकरणानि वासय परिधापय। कीदृशे जघने सरसघने शृंगाररससहिते निविडे
पुनः कीदृशे शंबरनामानं दैत्यं दारयति शंबरदारणः कामः स एव वारणो हस्ती तस्य कंदरे। अपरोपि हस्ती कंदरायां निहितो निधुवनं कुंजरो वारणः करी मतंगः इति
गुहा कंदरो वा स्त्री अपि वासये निवसन आच्छादनं एतस्येन वा तस्य प्रयोगः ७ श्रीजयदेवेत्यादि हे देव हृदयं जयं प्रयच्छ जयदेवस्य कवेर्वचसि वाक्ये सदयं दयासहितं यथास्यादेवं हृ
दयं कुरु। कीदृशे मंडने जयदेवस्याहंकारजनके। पुनः कीदृशे हरिचरणस्मरणामृतेन निर्मितं [illegible] पापरूपज्वरस्य खंडनं नाशनं ८

श्री०गी० ३६ रचयेत्यादि कुचयोः पत्रं कस्तूरिकापत्रं रचय। कपोलयोः चित्रं चित्ररचनाविशेषं कुरु। घने जघने कांचीं [illegible] कबरीभरे केशसमूहे स्रजं माल्यं
[illegible] वलयश्रेणीं पंक्तिं पाण्योर्हस्तयोः कलय अर्पय। पदे चरणयोः नूपुरौ कुरु। इत्यनेन प्रकारेण राधया निगदितः उक्तः पीतांबरः कृष्णः प्रीतियुक्तः तथा
करोदित्यर्थः ९। यद्गांधर्वेत्यादि। हे सुधियः पंडिताः सानंदाः संतो जयदेवकवेः श्रीगीतगोविंदतस्तत्सर्वं परिशोधयंतु। तत्किमित्याह। यद्गांधर्वेत्यादि। गांधर्वकलासु गानविद्यासु
कौशलं नैपुण्यं यच्च वैष्णवं विष्णुसंबंधि पद् अनुध्यानं अनुस्मरणचिंतनं यच्च शृंगारे विवेकतत्त्वं शृंगाररसस्य यो विवेकः संभोगविप्रलंभादिरूपेण यद्विवेचनं तस्य तत्त्वं य
थार्थमपि काव्येषु कविकर्मसु कवित्वनिर्माणरूपेषु लीलायितं विलसितं तत् सर्वमित्यर्थः। कीदृशस्य जयदेवस्य कृष्णैकभावात्मनः कृष्णे एकभावस्तत्पर आत्मा मनो यस्य

रचय कुचयोः पत्रं चित्रं कुरुष्व कपोलयोर्घटय जघने कांचीमंच स्रजा कबरीभरे। कलय वलयश्रेणीं पाणौ पदे कुरु नूपुराविति निगदितः प्रीतः पीतांबरोपि तथाकरोत् ९
यद्गांधर्वकलासु कौशलमनुध्यानं च यद्वैष्णवं यच्छृंगारविवेकतत्त्वरचनाकाव्येषु लीलायितं। तत्सर्वं जयदेवपंडितकवेः कृष्णैकतानात्मनः सानंदाः परिशोधयंतु सु
धियः श्रीगीतगोविंदतः १० श्रीभोजदेवप्रभवस्य रामादेवीसुतश्रीजयदेवकस्य। पराशरादिप्रियवर्गकंठे श्रीगीतगोविंदकवित्वमस्तु ११ इति श्रीगीतगो
विंदे श्रीजयदेवकृतौ स्वाधीनभर्तृकावर्णने प्रीतपीतांबरो नाम द्वादशः सर्गः १२ समाप्तमिदं गीतगोविंदकाव्यम्॥ ॥ ॥ ॥

तस्य। नान्यत्र निरेकाग्रेकामना यथा समरः ३। अधुना पितृमातृनाम निबध्नन् आर्यपदेन सज्जनान् [illegible] श्रीभोजदेवेत्यादि एतत्काव्यविरचनद्वारा [illegible]
[illegible] तेन श्रीजयदेवेन [illegible] श्रीपतिः [illegible] ४ इति श्रीकांतभट्टविरचितायां श्री ३६
गीतगोविंदटीकायां पदभावार्थचंद्रिकानामधेयायां द्वादशः सर्गः १२॥ ॥ वेदेभिर्वाणमुनिचंद्रमिते तपस्ये मासे सिते [illegible] विनंदने च श्रीवासुदेवभजना
नुभवेन नित्यानंदेन पुस्तकमिदं लिखितं मुदा परं १ श्रीरुक्मलेखकपाठकयोः। श्रीकृष्णाय देवकीनंदनाय नमः। श्रीयशोदानंदनाय नमः। श्रीगुरवे नमः॥ ॥

वेदाहिनागशशिसम्मितेऽब्दे कार्त्तिकमासे सितेनपसि पद्दतिसौम्यघस्रे। गोविंदभक्तिरसलिप्सुजनार्थमेषा
रुक्माभिधेन च समर्पितमस्तिरस्ते॥

पाण्डुलिपिः समाप्ता

MANUSCRIPT ENDS

ختم شد